National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 181-184
© 2026 NJHSR
www.sanskritarticle.com

**स्नेहाञ्जलि साहु**
संस्कृतविभागः,
गुजरातविश्वविद्यालयः,
अहमदाबाद् - ३८०००९

**Correspondence:**
**स्नेहाञ्जलि साहु**
संस्कृतविभागः,
गुजरातविश्वविद्यालयः,
अहमदाबाद् - ३८०००९

# आचार्यबनमालीबिश्वालविरचितकाव्येषु नारीस्वरूपविमर्शः

**स्नेहाञ्जलि साहु**

भारतीय-साहित्यपरम्परायां नारीस्वरूपस्य विशिष्टं स्थानं दृश्यते। प्राचीनकालादारभ्य अद्यतनकालपर्यन्तं कवयः नारीं केवलं रूपमाधुर्यस्य प्रतीकं न मन्यन्ते, अपितु सा शक्तिः, करुणा, त्यागः, सहिष्णुता च इत्यादीनां गुणानां मूर्तिरूपेण निरूपिता सन्ति। "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" इति प्रसिद्धवाक्येन अपि नारीणां महत्त्वं स्पष्टं दृश्यते। आचार्य-वनमालिविश्वालः स्व काव्येषु नारीं बहुविधैः दृष्टिकोणैः अवलोकयति। तेषु काव्येषु नारी केवलं गृहलक्ष्मी न, किन्तु समाजस्य आधारशिला इति प्रतिपाद्यते। सा माता रूपेण स्नेहस्य स्रोतः, पत्नी रूपेण सहधर्मचारिणी, कन्या रूपेण कोमलता-निर्मलतयोः प्रतीकः च इति वर्ण्यते। इदानीं बिश्वालमहोदयस्य काव्येषु वर्णितानां स्वरूपाणां विषये यथाशक्ति पर्यालोचयामि ।

**मातृरूपे नारीचित्रणम्**

संस्कृतसाहित्ये भारतीयमनीषिभिः नार्यै मातृरूपे यः समादरः प्रदत्तः सः सर्वान् समादरान् अतिशेते। मातुर्महिमाविषये श्रुति-स्मृति-पुराणेतिहासादिषु अनेके प्रसङ्गाः समुपलभ्यन्ते। तद्यथा- **"मातृ देवो भव"**[1] इत्यादयः ।

पुराणादिष्वपि उल्लेखः प्राप्यते यत् जन्मदातृत्वात् पालनाच्च जनकः पिता कथ्यते। जन्मदाता पितुः अपेक्षया अन्नदाता पिता गरीयान् वर्तते। तयोः पित्रोः अपेक्षयामाता शतं गुणा अधिकापूज्या मान्या चास्ति।

**पूज्यानांमेव सर्वेषामिष्टः पुज्यतमः परः।**
**जनको जन्मदानाच्च पालनाच्च पिता स्मृतः॥**
**गरीयाञ्जन्मदातुश्च सोऽन्नदाता पिता मुने ।**
**विनाऽन्नं नश्वरो देहो न नित्यं पितुरुद्भवः॥**
**तयोः शतगुणं माता पूज्या मान्या च वन्दिता।**
**गर्भधारणपोषाभ्यां सैवप्रोक्ता गरीयसी ।।**[2]

धर्मशास्त्रेऽपि महर्षिणा मनुना मातुः सम्मानविषये एवं प्रकारेण वर्णितम् -

**उपाध्यायान्दशाचार्या आचार्याणां शतं पिता।**
**सहस्रं तु पितृन्माता गौरवेणातिरिच्यते ।।**[3]

उच्चगौरवास्पदे स्थितायाः मातुः कल्याणार्थं मानवैः भक्तिपूर्वकं यत्किमपि क्रियते तदेव धर्मः वर्तते। गृहस्थैः मातरं जगन्माता 'आद्याशक्तिः' इति मत्वा भक्तिपूर्वकं सेवा करणीया। माता-पित्रोः प्रसन्नता एव सर्वेषां धर्माणां मूलमस्ति ।

**मातृस्वसा, मातुलानी पितृव्यस्त्री पितृस्वसा ।**
**श्वसूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः ।।**[4]

इतोऽपि शास्त्रेषु षोडशमातृणामुल्लेखः प्राप्यते । तथाहि-

**स्तन्यदात्री गर्भधात्री भक्ष्यदात्री गुरुप्रिया ।**
**अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका॥**

**सगर्भजा च या भगिनी स्वामिपत्नी प्रियाप्रसूः।**
**मातुर्माता पितुर्माता सोदरस्य प्रिया तथा ॥**
**मातुः पितुश्च भगिनी मातुलानी तथैव च।**
**जनानां वेदविहिता मातरः षोडश स्मृताः॥**[5]

उपर्युक्तविवेचनेन वयं निष्कर्षतया वक्तुं पारयामो यत् भारतीय समाजे आदर्शनारी त्रिरूपात्मिकाऽभिमता। माता, पत्नि, पुत्री इति एतास्वपि तिसृषु मातृरूपः सर्वोपरि सम्मानजनकः स्वीकृतः। शास्त्रेषु षोडशमातृवर्णनं दृश्यते। ते च भवन्ति – स्तन्यदात्री, गर्भदात्रि, भक्ष्यदात्री, गुरुपत्नि, इष्टदेवपत्नि, पितुः पत्नि, कन्या, अग्रजा, स्वामिप्नि, मातमहि, पितामहि, भ्रातुजाया, पितृव्या, मातृव्या मातुलस्यपत्नि एते षोडश मातरः। अतः सर्वैः मानवैः मातुः शुश्रूषा करणीया एव। येन इहलोके यशः परलोके च सुखं प्राप्नुयात्। मातुः स्थानं वस्तुतः स्वर्गादपि गरीयो वर्तते। उक्तञ्च..

**'जननीजन्मभूमिश्च स्वर्गादपि गरीयसी'**

**या देवी सर्वभूतेषु मातृ रुपेण संस्थिता नमस्तसैः... इति**

एवं प्रकारेण प्राचिनकाव्यादिषु मातृरुपेण नारीणां वर्णना दृष्टा वयं अधुना कवेः वनमालीबिश्वाल काव्येषु कुत्र कुत्र मात्रायाः वर्णनं लभ्यते तद् पश्यामः। यथा-

**स्मितं हासं दत्त्वा जयति भुवने चित्तमपरं**
**स्वामातुः क्रोटस्थो न भवति कदोद्वेलितमनः।**
**शिशुः शेते चैकाग्रतममनसोद्वेगरहितः**
**पिवन् स्तन्यं मातुर्न गणयति दुःखं न च सुखम्॥**[6]

अस्मिन् श्लोके कवि मातोः त्याग विषये वर्णयति एवं शिशोः जीवनस्य परमानन्द मय क्षणानां वर्णनं करोति। शिशोः स्तन्यपाने मातोः आनन्दं प्रददाति इति कवेः कथनम्। अन्यत्र कवितायां भारतं माता रुपेण वर्णयति यथा-

**जाताश्चात्र वयं स्वमातुरुदरात् ताताश्च भिन्नास्तु नः**
**सर्वेषां जननीव भारतमिहास्त्यस्याः वयं चात्मजाः।**
**हत्वात्रापि सहोदरानहरहः शान्तिर्न चाप्नोति यः।**
**सः किं भारतसन्ततिर्नहि पुनर्नष्टस्य कान्या गतिः॥**[7]

श्लोकस्थ आद्य पङ्क्तिद्वये कविः वर्णयति यति कथं भारतीयाः राष्ट्रं मातृरुपेण पूज्यन्ते। यः कोपि अस्मिन् भारते जननं प्राप्नोति सर्वेपि भारतं मातारुपेण मन्यन्ते एवम् आत्मानं तस्य सन्तानः।

पुनः कविः स्व मातुः स्नेहं संस्मर्यं ऋतुपर्णाकाव्ये मातुः विषये वर्णयति यथा-

**प्रवाहयसि हृदयात्**
**ममता-निर्झरान,**
**परिवर्तयति नित्यं**
**तक्षणं भूषणेन केन**
**दुःखमपि सुखातिशयेन,**
**संरक्षितास्तस्य कृते**
**मातः । तव सर्वाश्च करुणाः ।**
**सा यदा वदति मातः ।**
**अजायत ममता ते मरुभूमिःशुष्का,**
**भूषणं दूषणायितं**
**सुखं दुःखायितम्,**
**अभवत् करुणाऽकस्मार**
**दाहोत्सुका काचिदग्निशिखा । ...... इत्यादि ।**[8]

एवंप्रकारेण मातुर्महिमा अन्येषु काव्येषुऽपि समुपलभ्यन्ते ।

**पत्नीरूपे नारीचित्रणम् -**

विशालेऽस्मिन् संस्कृतसाहित्ये अनेकैः महामान्यैः वाल्मीकि-व्यास-कालिदास-भवभूतिप्रभृतिभिः कविभिः नारीणां पत्नीरूपे विस्तृतं चित्रणं विहितम्। आदिकविना वाल्मीकिना विरचिते 'रामायणम्' इत्याख्ये महाकाव्ये भगवत्या जनकनन्दिन्या यच्चरित्रचित्रणमुपनिबद्धं तत्र कस्य चेतो न आह्लादयति। जनकनन्दिन्याः सीतायाश्चरित्रं भारतीयनारीणां कृते महदादर्शभूतमस्ति। वाल्मीकीयरामायणे अनेके प्रसङ्गाः प्रमाणभूताः सन्ति। लङ्कापतिः रावणः यदा भूयोभूयः तां प्रार्थयति तदा सीता तस्य प्रार्थनां तिरस्करोति कथयति च भो लङ्केश! त्वया सह प्रेमालापः? नहि न हि, त्वां मम वामपादोऽपि स्प्रष्टुं न शक्नोति ।

**चरणेनापि सव्येन न स्पृशेयं निशाचरम् ।**
**रावणं किं पुनरहं कामयेयं विगर्हितम् ।।**[9]

लङ्कापतिरावणस्य निधनान्तरं यदा भगवान् श्रीरामः सीतायाः चरित्रविशुद्धिविषये पृच्छति तदा सीता वदति यत्-यस्मिन् वस्तूनि यस्य अधिकारो भवति स तदर्थमेव उत्तरदायी भवति। अहं स्वहृदयस्य स्वामिनी अस्मि। तद् हृदयं मदधीनं वर्तते तथा तव चिन्तने रतमस्ति। मेऽङ्गानि पराधीनानि सन्ति। रावणः मेऽङ्गानि स्पृशति चेत् मम कोऽपराधः?

**मदधीनं तु यत् तन्मे हृदयं त्वयि वर्तते ।**
**पराधीनेषु गात्रेषु किं करिष्याम्यनीश्वरा ।।**[10]

अतः मम चरित्रविषये त्वया कथमपि न शङ्कनीयः। इत्थमुदात्तभावनया युक्तमस्ति देव्याः भगवत्याः सीतायाः चरित्रम्। आधुनिक युगे पत्नि विषये अपि वहवः कवयः स्विय रचनायां वहुत्र विवेचनादिकं कृतम्। एतेषु सर्वेषु कवि वनमालिबिश्वालः अन्यतमः। कवेः रचनायाः नारी चरीत्रस्य वहुत्र वहुप्रकारेण वयं द्रष्टुं शक्नुमः। तत्र पत्नि प्रेमिकायोः भेदः आदौ व्यथा इति पुस्तके कवि प्रेमिका कवितायां एवं वर्णयति यत्-

**प्राक् प्रेमिका**
**पत्नि ततः परम्।**
**प्रेमिकात्वे आत्मृनिवेदनं, पूर्णसमर्पणम्**
**पत्नित्वे तु स्थितिर्भिन्ना**
**क्षेत्राद् बहिरधिकारोऽनधिकारचेष्टा।**
**प्रेमिकायां प्रेम**
**तद्विरहे पत्नी,**
**प्रेमिका प्रथमावस्था**
**द्वितीया पत्नि**
**प्रेमिकायां पत्नित्वं तु सुष्ठु सम्भव्यते**
**पत्न्या पुनः प्रेमिकात्वं कपोलकल्पितम्॥**[11]

तद्वत् कवेः कव्ये जाया इत्यस्मिन् विषये उच्यते यत् –

**न सा व्यक्ति**

**किन्तु क्वचित् सृष्टि**
**मृदु- मन्दं हसन्ति झरणा,**
**प्राकृतिक हरितिमा क्वचित्**
**क्वचिदेकः आमावास्या- चन्द्रः**
**क्वचिदोषधिशं विना विरही कुमुदः।**[12]

इत्यत्र कविः जायायाः वर्णनं करोति कथं सा व्यक्ति न परं प्रकृतेः अनन्य सृष्टि या जाया रुपेण आगत्य स्वयं कष्टादिकं सोढ्वा पति आनन्दं प्रयछति। एवमन्यत्र –

**अप्राप त्वां जीवनसङ्गिनी**
**हृता निःसङ्गता**
**न जाने विस्मृतं कदा मदीयमस्तित्वम्।**
**मन्निकटे न त्वमद्य**
**मनसि मे सुविषादः,**
**त्वमपि जानिया प्रिये।**[13]

कवेः **निरवस्वनः** इति पुस्तके कथानां सग्रहः रचना लभ्यते तत्र पत्नेः विषये एका कथा लभ्यते। **प्रियतमा दैनन्दिनी तथा मे श्रीमती** कथायां विशिष्टता किमपि भवति इति न परं सामान्य जनेषु पति पत्न्योः पत्रिका विषयाधारिकृत्य कथं कलहः जायते। इति अत्र वर्णितम् अस्ति। गृहस्थ जीवने प्रित्या अथवा क्रोधेन वा भवतु दाम्पत्यो प्रेमकलहः तु चलति। तस्य वर्णनं कवि पत्न्याः सह सामान्य जीवन किदृशि भवति इति दर्शयति। इतोपि **जगन्नाथ चरितम्** इत्यत्रापि भगवता कलियुगप्रत्यक्षदैवतस्य पत्न्या सह कथं मनोमालिन्यं भवति तस्य निवारणं कथं भगवान् जगनन्नाथः श्रीगुण्डिचा यात्रात् आगत्य पत्न्याः क्रोधस्य निराकरणार्थं रसगोलकं दत्वा पत्न्याः मान भञ्जनं कुर्वन्ति इत्यस्मिन् विषये प्रदर्शितम्। पत्न्यै किदृस स्थानम् किदृशि सम्माननम् देयम् इत्यादि विषये अत्र वर्णितम् अस्ति।

**प्राणानिव प्रियतमां सततं स्मरामि**
**वद्धस्तया परोकरोऽद्य विवाहसूत्रैः।**
**नैतच्छ्रुतं जनरवं वत ! प्रतेयवैमि**
**छिन्नः सखे ! वरमनोरथपादपो मे॥**
**कान्तामनः पररतं ननु वीक्ष्य स्वप्ने**
**मुग्धः प्रियो न सहते यदि वी तपस्वी।**
**आलोक्य तां प्रियतमां परकान्तारक्तां**
**छिन्नः सखे ! वरमनोरथपादपो मे॥**
**कष्टं निवेद्य सुहृदे वत ! सान्त्वनार्थ-**
**मिष्टं न मेऽप्यधिगतं ह्युपहासितोऽस्मि।**
**मित्रं व्यथां शमयितुं यदि नोत्सहेद् हा !**
**छिन्नः सखे ! वरमनोरथपादपो मे॥**
**पत्निं स्मरामि विरहाद् व्यथितो नवोढां**
**विस्मृत्य मां वसति या जनकस्य गेहे।**
**प्राप्यापि पत्रनिचयं न लिलेख पत्रं**
**छिन्नः सखे ! वरमनोरथपादपो मे॥**[14]

सम्पुर्ण कवितामिदं कवि पत्न्याः पितुगृहे यदा भवति तदानिं पत्याः किदशि व्यथा जायते मनसि तस्य वर्णनं करोति।

**भगीनीरूपे नारीचित्रणम् -**

भगिनी नाम स्नेहस्य, ममतायाः च मूर्तिरूपा भवति। सा सदैव भ्रातुः हितकामिनी, शुभचिन्तकी च भवति। बाल्यकालात् एव सा सहचर्या क्रीडायां, अध्ययनस्य च भागिनी भवति। भगिनी भ्रातुः दुःखेषु सान्त्वना ददाति, सुखेषु च सह आनन्दं अनुभवति। तस्या हृदये निष्कपटः प्रेम, त्यागभावना च वसति इति ।

श्रीजगन्नाथसंस्कृतौ भगवान् जगन्नाथो बलदेवेन भगिनीसुभद्रया च सह रथमारुह्य श्रीमन्दिरात् गुण्डिचामन्दिरं प्रति याति। जगन्नाथः नन्दिघोषरथेन, बलदेवः तालध्वजेन सुभद्रा च दर्पदलनरथेन पुथक् पृथग् भक्तैराकर्षिता गुण्डिचामन्दिरं प्रत्यागत्य तत्र सप्तदिनानि स्थित्वा पुनः श्रीमन्दिरं प्रत्यावर्त्तन्ते। एषा संस्कृति सर्वे जानन्तिरेव । अहं केवलं बिश्वालमहोदयस्य काव्यानुसारं उपस्थापयामि। यथा-

**संज्ञा भिन्ना भवति तु रथानां च भिन्न स्वरूपं**
**मुख्यो यत्रास्त्वखिलजगतः स्वामित्तो नन्दिघोषः ।**
**आकृत्या वै तदनु बलभद्रस्य तालध्वजोऽस्ति**
**भद्रायाः 'देवदलनमथ स्यन्दनं रूयातमस्ति ।।**[15]

पुनः यात्राकाव्ये यथा-

**वदन्ति स्म भगिनीं त्वां सर्वे**
**न जाने तत् कथमिव**
**मह्यमरोचत**
**यतमानोऽप्यहं किन्तु**
**सकृदपि भगिनीं नावदम्,**
**वक्तुमपि तथा न प्राभवम् .... इति ।**[16]

एवमेव बिश्वालमहोदयस्य अन्यकाव्येषु अपि भगिनीरूपे नारीचित्रणम् समुपलभ्यन्ते ।

**कन्यारूपे नारीचित्रणम्**

कन्यारूपेण नारीचित्रणम् महाकविकालिदासविरचितसाहित्ये समुपलभ्यते। तदनुशृत्य बिश्वालमहोदयः स्वकाव्येषुऽपि कन्याया विषये सूक्ष्मैकतया विश्लेषणं करोति। कन्या स्वभावतः कोमला, लज्जाशीला, विनयसम्पन्ना च भवति। तस्याः वाणी मधुरा, आचरणं शुद्धं, चित्तं निष्कपटं च भवति।

आचार्यस्य काव्येषु कन्याया हसितं चन्द्रकान्तिमिव मनोहरं, तस्याः चलनं लतायाः कम्पनमिव सुकुमारं, तस्याः वचनं वीणानिनादमिव मधुरं वर्णितमस्ति। यदा कन्या विबाहयोग्या संयाता तदा तस्या विवाहकार्यं करणीया। तदनुश्रृत्य दारुब्रह्म इति काव्ये कन्यादानम् इति कवितायां कविः एका अनाथकन्यायाः विबाहे महाप्रभुश्रीजगन्नाथः केनापि रूपेण कन्यादानं करिष्यति तद् विषये वर्णयति । यथा-

**विवाहेन नारीजन्म भवेत् सार्थकम्,**
**तव हुण्डि धनमस्तु मम यौतकम् ।**
**भविष्यामि वधूः यच्छ 'पाट'-वसनं**
**परिधास्यामि यच्छ ते रत्नाभूषणम्।**
**अभडाम् अत्स्यन्ति मम वरयात्रिणः**
**जगन्नाथ करिष्यसि त्वं कन्यादानम् ।** दारु- पृ- 63

पुनः वैष्णोदेवीशतके केनापि प्रकारेण सा रत्नाकरं कन्यारूपेण प्रतिपाद्यते तद् विषये यथा-

**भारते दक्षिणभागे रत्नाकराक्षसागरः।**

**आसीत्सन्तानहीनस्तु दौर्भाग्याच्च नृपोत्तमः।**
**सा दैवी बालिका तत्र जनिं लेभे यदा स्वयम्।**
**वचनं स्वीकृतं राज्ञः पूर्वरात्रेस्तु किञ्चन।** वै.श.-22-23

साम्प्रतिकयुगे कन्याः अपि स्वपितृवचनं न शृण्वन्ति; एवं च अल्पाः अपि महतां विरुद्धं प्रवर्तन्ते इति । ते स्वच्छाचारिता इच्छन्ति । तद् विषये सङ्गमेनाभिरामा इति काव्यस्य आखुर्गजननमहो! कवलीकरोति इति कवितायां कविः वर्णयति –

**कन्यापि नानुमनुते पितराविदानी**
**आखुर्गजननमहो कवलीकरोति ।।** सङ्गमे- पृ-11

एवमेव बिश्वालमहोदयस्य अन्यकाव्येषु अपि कन्यारूपे नारीचरित्रं चित्रितमस्ति।

**प्रेमिकारूपेण नारीचित्रणम्-**

नारी न केवलं मातृरूपेण, अपि तु प्रेमिकारूपेण अपि मानवजीवनस्य माधुर्यपक्षं दर्शयति। प्रेमिका नारी हृदयस्य कोमलतां, स्नेहस्य गाम्भीर्यं, तथा समर्पणभावं च प्रकाशयति। प्रेमिकारूपेण नारी अत्यन्तं कोमला, मृदुभाषिणी, तथा करुणामयी भवति। तस्या: हृदये निष्कपटं प्रेम वर्तते। सा स्वप्रियस्य सुखे स्वसुखं पश्यति, तस्य दुःखे च दुःखिता भवति। एषा भावना एव प्रेमस्य वास्तविकं स्वरूपम् अस्ति। प्रेमिका विषये बिश्वालमहोदयः लिखति –

**प्राक् प्रेमिका पत्नी ततः परम् ।**
**प्रेमिकात्वे आत्मनिवेदनं, पूर्णसमर्पण् ...... इति ।**[17]

नारी प्रेमिका स्वभावतः त्यागमयी भवति। सा स्वार्थं परित्यज्य प्रियजनस्य कृते सर्वं समर्पयति। पुनः यात्रा काव्ये यथा-

**परिचयोऽप्येवमवर्द्धत**
**त्वया विना दिनायते क्षणम्,**
**त्वया विना वर्षायते मासः**
**त्वया विना मासायते दिनम्।**
**अद्यत्वे च कुत्रचिन्मे मनो न लगति**
**प्रतीक्षेऽहं चातकवत् महाविद्यालये,**
**समयाच्च पूर्व तव आगमनवेलाम्**
**अध्यापक-साधारणकक्षे ....... इति ।**[18]

एवमेव **प्रियतमा तथा वेलेण्टाइन डे** इत्यादि काव्येषु प्रेमिकायाः विषये कविना वहुत्र वर्णना कृता ।

उत्कले एकं आभाणकं विद्यते नारीशक्ति एका प्रचण्डशक्ति । सा शक्ति कदाचित् दुर्गा-काली – भैरवी इति देद्दीप्यन्ते। नारी समाजस्य मानदण्डः। या नारी सम्यक् शिक्षिता, सुरक्षितता च प्राप्नोति, सा राष्ट्रं समृद्धिं प्रति नेतुं शक्नोति। तदर्थं विज्ञापनम् इति कवितायां यथा-

**नारीशक्तिः वलवती,**
**मानदण्डः सभ्यतायाः**
**मानवप्रगतेः,**
**देवावासः नारी, ततः पूजास्थानं**
**अपि विज्ञापनं ?**
**नारीपूजासाधनस्य ... इत्यादि ।**[19]

एवंरूपेण आचार्य-वनमाली-बिश्वालस्य काव्येषु नारीस्वरूपस्य व्यापकः, संवेदनशीलः च विमर्शः दृश्यते। तेन नारीणां गौरवम्, स्वातन्त्र्यम्, सामर्थ्यं च उजागरितम्। तस्य काव्यानि न केवलं साहित्यिकदृष्ट्या महत्वपूर्णानि, अपितु सामाजिक-जागरणस्य साधनानि अपि सन्ति।

**सन्दर्भग्रन्थसूची –**


1. संस्कृतवाङ्गय का बृहद् इतिहास - बलदेव उपाध्याय, उत्तरप्रदेश संस्कृत संस्थान, 1977
2. सङ्गमेनाभिरामा (1996), बनमाली बिश्वालः , पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद-211019
3. ऋतुपर्णा (1999) बनमाली बिश्वालः पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद-211019
4. दारुव्रह्म (2001) बनमाली बिश्वालः पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
5. व्यथा (1997) बनमाली बिश्वालः पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
6. यात्रा (2002) बनमाली बिश्वालः पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
7. प्रियतमा(2012) बनमाली बिश्वालः पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
8. वेलेण्डाइन्-डे- सन्देशः - बनमाली बिश्वालः पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
9. वैष्णोदेवी शतकम् , बनमाली बिश्वालः , वैष्णोदेवी-परकं दैवीय खण्डकाव्यम्


**संदर्भः**

[1]तै.उ. 1-11
[2]ब्र.वै.पु अ.40.श्लो.84.85.86
[3]मनु.स्मृ.2.145
[4]मनु.स्मृ.2.131
[5]ब्र.वै.पु. गणेशखण्ड.15.41.42.43
[6]सङ्ग.रा.20
[7]सङ्ग.रा.21
[8]ऋतुपर्णा/141
[9]रामा.सु.26.10
[10] रामा.यु.119.9
[11] व्यथा.पृ.24
[12] ऋ.तु.71
[13] ऋत्. 34
[14] सङ्ग.रा.पृ.13
[15] सङ्गमे –पृ-52
[16] यात्रा-पृ-26
[17] व्यथा-पृ-24
[18] यात्रा-पृ. 63
[19] व्यथा-61